# अथ नारायणहृदयम्

आचम्य, प्राणानायम्य, देशकालौ स्मृत्वा । अस्मद्गुर्वन्तर्गत-श्रीभारतीरमणमुख्यप्राणान्तर्गतश्रीलक्ष्मीनारायणप्रेरणया श्रीलक्ष्मी-नारायणप्रीत्यर्थं, ममाभीष्टसिध्यर्थं, सङ्कलीकरणरीत्या सम्पुटी-करणरीत्या वा नारायणहृदयस्य सकृदावर्तनं करिष्ये ।

अस्य श्रीनारायणहृदयस्तोत्रमन्त्रस्य भार्गवर्षयेनमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीलक्ष्मीनारायणदेवतायै नमः हृदये । ऐं बीजाय नमः गुह्ये । ह्रीं शक्त्यै नमः पादयोः । क्लीं कीलकाय

नमः सर्वाङ्गे । श्रीलक्ष्मीनारायणप्रीत्यर्थे जपे विनियोगः।(श्रीं बीजाय नमः गुह्ये । नमः शक्त्यै नमः पादयोः। नारायणाय कीलकाय नमः सर्वाङ्गे ।)

ओं नारायणः परं ज्योतिरित्यङ्गुष्ठाभ्यां नमः । ओं नारायणः परं ब्रह्मेति तर्जनीभ्यां नमः । ओं नारायणः परो देवेति मध्यमाभ्यां नमः । ओं नारायणः परं धामेति अनामिकाभ्यां नमः । ओं नारायणः परो धर्मेति कनिष्ठिकाभ्यां नमः । ओं नारायणः परो वेदेति करतलकरपृष्ठाभ्यां नमः ॥

ओं नारायणः परं ज्योतिरिति हृदयाय नमः । ओं नारायणः परं ब्रह्मेति शिरसे स्वाहा । ओं नारायणः परो देवेति शिखायै वषट् । ओं नारायणः परं धामेति कवचाय हुं । ओं नारायणः परो धर्मेति नेत्राभ्यां वौषट् । ओं नारायणः परो वेदेति अस्त्राय फट् । ओं भूर्भुवस्वरोमिति दिग्बन्धः ।

**अथ ध्यानम्**

उद्यद्भास्वत्समाभासः चिदानन्दैकदेहवान् ।
शङ्खचक्रगदापद्मधरो ध्येयोऽहमीश्वरः ॥१॥

लक्ष्मीधराभ्यामाश्लिष्टः स्वमूर्तिगणमध्यगः ।
ब्रह्मवायुशिवाहीशविपैः शक्रादिकैरपि ॥२॥

सेव्यमानोऽधिकं भक्त्या नित्यनिश्शेषशक्तिमान् ।
मूर्तयोऽष्टावपि ध्येयाश्चक्रशङ्खवराभयैः ॥३॥

उद्यदादित्यसङ्काशं पीतवाससमच्युतम् ।
शङ्खचक्रगदापाणिं ध्यायेल्लक्ष्मीपतिं हरिम् ॥४॥

॥ 'ॐ नमो नारायणाय' इति मन्त्रजपं कृत्वा ॥

## मूलाष्टकम्

ओं नारायणः परं ज्योतिरात्मा नारायणः परः
नारायणः परं ब्रह्म नारायण नमोऽस्तु ते ॥१॥

नारायणः परो देवो दाता नारायणः परः ।
नारायणः परो ध्याता नारायण नमोऽस्तु ते ॥२॥

नारायणः परं धाम ध्यानं नारायणः परः ।
नारायणः परो धर्मो नारायण नमोऽस्तु ते ॥३॥

नारायणः परो देवो विद्या नारायणः परः ।
विश्वं नारायणः साक्षान्नारायण नमोऽस्तु ते ॥४॥

नारायणाद्विधिर्जातो जातो नारायणाच्छिवः ।
जातो नारायणादिन्द्रो नारायण नमोऽस्तु ते ॥५॥

रविर्नारायणस्तेजश्चान्द्रं नारायणं महः ।
वह्निर्नारायणः साक्षान्नारायण नमोऽस्तु ते ॥६॥

नारायण उपास्यः स्याद्गुरुर्नारायणः परः ।
नारायणः परो बोधो नारायण नमोऽस्तु ते ॥७॥

नारायणः फलं मुख्यं सिद्धिर्नारायणः सुखम् ।
सेव्यो नारायणः शुद्धो नारायण नमोऽस्तु ते ॥८॥

॥ इति मूलाष्टकम् ॥

## अथ प्रार्थनादशकम्

नारायणस्त्वमेवासि दहराख्ये हृदि स्थितः ।
प्रेरकः प्रेर्यमाणानां त्वया प्रेरितमानसः ॥१॥

त्वदाज्ञां शिरसा धृत्वा भजामि जनपावनीम् ।
नानोपासनमार्गाणां भावकृद्भावबोधकः ॥२॥

भावार्थकृद्भावभूतो भावसौख्यप्रदो भव ।
त्वन्मायामोहितं विश्वं त्वयैव परिकल्पितम् ॥३॥

त्वदधिष्ठानमात्रेण सैव सर्वार्थकारिणी ।
त्वमेव तां पुरस्कृत्य मम कामान् समर्पय ॥४॥

न मे त्वदन्यस्त्राताऽस्ति त्वदन्यं नहि दैवतम् ।
त्वदन्यं नहि जानामि पालकं पुण्यरूपकम् ॥५॥

यावत् सांसारिको भावो मनस्थो भावनात्मकः ।
तावत् सिद्धिर्भवेत् सद्यः सर्वथा सर्वदा विभो ॥६॥

पापिनामहमेवाग्र्यो दयालूनां त्वमग्रणीः ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥७॥

त्वयाप्यहं न सृष्टश्चेन्न स्यात्तव दयालुता ।
आमयो नैव सृष्टश्चेदौषधस्य वृथोदयः ॥८॥

पापसङ्घपरिक्रान्तः पापात्मा पापरूपधृक् ।
त्वदन्यः कोऽत्र पापेभ्यस्त्राता मे जगतीतले ॥९॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥१०॥

प्रार्थनादशकं चैव मूलाष्टकमुदाहृतम् ।
यः पठेच्छृणुयान्नित्यं तस्य लक्ष्मीः स्थिरा भवेत् ॥११॥

नारायणस्य हृदयं सर्वाभीष्टफलप्रदम् ।
लक्ष्मीहृदयकं स्तोत्रं यदि चेत्तद्विना कृतम् ॥१२॥

तत्सर्वं निष्फलं प्रोक्तं लक्ष्मीः क्रुध्यति सर्वदा ।
एतत् सम्पुटितं स्तोत्रं सर्वकामफलप्रदम् ॥१३॥

लक्ष्मीहृदयकं चैव तथा नारायणात्मकम् ।
जपेद्यः सम्पुटीकृत्य सर्वाभीष्टमवाप्नुयात् ॥१४॥

नारायणस्य हृदयमादौ जप्त्वा ततः परम् ।
लक्ष्मीहृदयकं स्तोत्रं जपेन्नारायणं पुनः ॥१५॥

पुनर्नारायणं जप्त्वा पुनर्लक्ष्मीकृतं जपेत् ।
पुनर्नारायणं जाप्यं सङ्कलीकरणं भवेत् ॥१६॥

एवं मध्ये द्विवारेण जपेत्सङ्कलितं हि तत् ।
लक्ष्मीहृदयकं स्तोत्रं सर्वकामप्रकाशितम् ॥१७॥

तद्वज्जपादिकं कुर्यादेतत्सङ्कलितं शुभम् ।
सर्वान् कामानवाप्नोति आधिव्याधिभयं हरेत् ॥१८॥

गोप्यमेतत् सदा कुर्यान्न सर्वत्र प्रकाशयेत् ।
इति गुह्यतमं शास्त्रमादौ ब्रह्मादिकैः पुरा
तस्मात् सर्वप्रयत्नेन गोपयेत् साधयेत् सुधीः ॥१९॥

यत्रैतत्पुस्तकं तिष्ठेल्लक्ष्मीनारायणात्मकम् ।
भूताः पिशाचवेतालाः न स्थितास्तत्र सर्वदा ॥२०॥

लक्ष्मीहृदयकं प्रोक्तं विधिना साधयेत् सुधीः ।
भृगुवारे च रात्रौ च पूजयेत् पुस्तकद्वयम् ॥२१॥

सर्वथा सर्वदा सत्यं गोपयेत् साधयेत् सुधीः ।
गोपनात् साधनाल्लोके धन्यो भवति तत्त्वतः ॥२२॥

॥ इत्यथर्वणरहस्ये उत्तरभागे नारायणहृदयम् ॥